शब्दो वेदलक्षणो यस्येति वा, अम्बनम् अम्बः शब्दः। त्रयोऽकारोकारमकाराः अम्बाः शब्दाः प्रतिपादकाः वाचका वा अस्येति वा, त्रीणि पृथिव्यन्तरीक्षद्युलोकाख्यानि अम्बकानि स्थानानि यस्येति वा। १शिवे अमरः "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्" यजु०३।६० "जडीकृतस्त्र्यम्बकवीक्षणेन" महेश्वरस्त्र्यम्बक एव नापरः" रघुः। २दुर्गायां स्त्री "सोमसूर्य्यानलाक्षित्वात् त्र्यम्बका सा स्मृता बुधैः" देवीपुरा०।

त्र्यम्बकसख पु० ६त० टच् समा०। कुवेरे अमरः कुवेरशब्दे तस्य तथात्वम् दृश्यम्। [क्यादिकं दृश्यम्।

त्र्यरुण पु० त्रिवृष्णपुत्रे राजर्षिभेदे त्रैवृष्णशब्दे ऋ० वा-

त्र्यरुषि त्रि० त्रीणि अरुषीणि रोचमानानि शुभ्राणि ककुपृष्ठपार्श्वस्थानानि यस्य। रोचमानशुभ्रपृष्ठादित्रययुक्ते गवादौ। "त्र्यरुषीणां दश गवां सहस्रा" ऋ० ८।४६।२२।

त्र्यवि पु० षण्मासात्मकः कालः अविः त्रिस्रोऽवयोऽस्य। अष्टादशमासवयस्के पशौ। "त्र्यविर्वयस्त्रिष्टुप्छन्दः" यजु० १४।१०। त्रीन् लोकान् अवति अव—रक्षणादिषु इन्। वेददी०। "तस्थौ त्र्यविं रेरिहाणा" ऋ०३।५५।१४। "त्र्यविं सार्द्धसंवत्सरवयस्को वत्सस्त्र्यविरुच्यते तत् समानमादित्यम् त्रीन् लोकानवति स्वतेजसा व्याप्नोतीति वा" भा० उक्तेः २त्रैलोक्यव्यापके च।

त्र्यब्द न० समा० द्वि०पात्रा०। १वर्षत्रये "त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम्" मनुः। त्रयोऽब्दा वयोमानं यस्य तद्धितार्थद्विगुः आर्हीयठञ् अध्यर्द्धेत्यादि पा० तस्य लुक्। २त्रिवर्षवयस्के त्रि०।

त्र्यशीति स्त्री त्र्यधिकाऽशीतिः शाक० त० त्रयश्च अशीतिश्च समा० द्व० वा। (तिराशी) १त्र्यधिकाशीतिसंख्यायां २तत्संख्येये च। ततः पूरणे डट्। त्र्यशीत तत्पूरणे त्रि०। स्त्रियां ङीप् तमप्। त्र्यशीतितम तत्पूरणे त्रि०। त्र्यशीत्या युतं शतादि ड। त्र्यशीत तद्युतशतादौ।

त्र्यष्टक न० सुश्रुतोक्ते जलनिक्षेपणस्थानभेदे। पञ्च निक्षेपणानि भवन्ति। तद्यथा फलकं त्र्यष्टकं मुञ्जवलय उदकमञ्चिका शिक्यञ्चेति" सुश्रु०।

त्र्यष्टन् त्रि० त्रिगुणिताः अष्ट। १चतुर्विंशतिसंख्यायां २तत्संख्येये च। "त्र्यष्टवर्षोऽष्टवर्षां वा धर्म्मे सीदति सत्वरः" मनुः।

त्र्यस्र न० तिस्रः अस्रयः कोणा अस्य अच् समा०। १त्रिकोणे राजनि०। "प्रथमत्र्यस्रे द्वितीयत्र्यस्रे इत्यादि" कालीपूजापद्धतिः।

त्र्यह पु० त्रयाणामह्नां समाहारः टच् समाहारद्विगुत्वात् नाह्नादेशः। "अह्नाह्नाः पुंसि" पा० पुंस्त्वम्। दिनत्रये। उत्तरपदद्विगौ तु अह्नादेशः त्र्यह्नप्रिय इत्यादि। "त्र्यहं न कीर्त्तयेत् ब्रह्म राज्ञो राहोश्च सूतके" "त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्। त्र्यहं परन्तु नाश्नीयात् प्राजापत्यं चरन् द्विजः" मनुः।

त्र्यहस्पर्श पु० त्र्यहं चान्द्रदिनत्रयं स्पृशति स्पृश—अण्। १तिथित्रयस्पर्शिन्येकसावनदिने त्र्यहस्पर्शिनि २दिनत्रये च

त्र्यहस्पृश पु० "एकं दिनं यत् तिथित्रयं च स्पृशेत्तमाहुर्द्दुनयोऽवमाख्यम्। एका तिथिस्त्रीणि दिनानि यत् स्पृशेत्तदाहुस्त्रिदिनस्पृशन्तु" इत्युक्ते सावनदिनत्रयस्पर्शिनि एकस्मिन् तिथौ "त्र्यहस्पृशं नाम यदेतदुक्तं तत्र प्रयत्नः कृतिभिर्विधेयः। विवाहयात्राशुभपुष्टिकर्म्मसर्वं न कार्य्यं त्रिदिनस्पृशे तु" ज्यो० त०। क्विन्। त्र्यहस्पृश् क्विन्नन्तत्वात् झलि पदान्ते च कुः। तत्रार्थे "तिथिवारत्रये चैका त्र्यहस्पृक् समुदाहृता"। "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्र्यहस्पृक् तदहो रात्रसुपोष्या सा सदा तिथिः" स्मृतिः। [क्रतुभेदे।

त्र्यहीन पु० त्रिभिरहोभिः निर्वृत्तः ख। त्रिदिनसाध्ये

त्र्यहैहिक त्रि० ईहा चेष्टा तस्यां भवं ठञ् ऐहिकम् धनादि। त्र्यहपर्य्याप्तमैहिकं धनं यस्य। दिनत्रयनिर्वाहोचितधनशालिनि। "त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा" मनुः।

त्र्याक्षायण पु० त्र्यक्षस्य युवाऽपत्यम् फञ् ऐषुकारिगणे "द्याक्षायण त्र्याक्षायणेति निर्देशात् "न य्वाभ्यां पदान्ताभ्यां पूर्वौ ताभ्यामैच्" पा० सूत्रोक्तं कार्य्यं न। त्र्यक्षस्य शिशुपालहरादेर्यून्यपत्ये। तस्य विषयो देशः ऐषुका० भक्तल्। त्र्याक्षायणभक्त तदीये विषये।

त्र्यायुष न० त्रयाणां बाल्ययौवनस्थाविराणामायुषां समाहारः वेदे अच् समा०। बाल्याद्यायुस्त्रये। "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्" यजु० ३।६२।

त्र्यार्षेय पु० त्रयः आर्षेयाः ऋषयः यत्र। त्रिप्रवरे १गोत्रभेदे आर्षेयशब्दे दृश्याम्। ऋषेरयम् ढक् आर्षेयः ऋषिधर्म्मः त्रयः आर्षेया धर्म्मायेषाम्। २अन्धबधिरमूकेषु तेषां हि यथा ऋषिधर्म्मवत्त्वं तथा समर्थितं तत्त्वबोधिन्याम् यथा "एतत्त्र्यायमूलक एव तिर्य्यक्पकुत्यार्षेयदेवतानां यागेषु नाधिकार इति प्रवादः। त्र्यार्षेयास्त्रय ऋषि-